# ५. हिमवद्वर्णनम्

द्वितीयः भागः

## पठन्तु, विचिन्त्य वदन्तु

| | | |
|---|---|---|
| अध्यापकः | - | अरविन्द ! ह्यस्तनपाठे मया कं कविम् उद्दिश्य पाठः पाठितः ? |
| अरविन्दः | - | वाल्मीकिमहर्षिमुद्दिश्य । |
| सरला | - | आर्य ! सः आदिकविः इति च भवता कथितः । |
| अध्यापकः | - | समीचीनम् । तथैव केषाञ्चन संस्कृतकवीनां नामानि वदन्तु । |
| अरविन्दः | - | कालिदासः, भारविः । |
| सरला | - | दण्डी, माघः भवभूतिश्च । |
| अध्यपाकः | - | अद्य महाकविकालिदासमुद्दिश्य ज्ञास्यामः । |

**प्रश्नाः ?**

1. वाल्मीकिना रचितः ग्रन्थः कः ?
2. केषाञ्चित् कवीनां नामानि वदन्तु ?
3. संस्कृतकवीनां काव्यनामानि अधिकृत्य वदन्तु ।

## उद्देश्यम्

- ✶ संस्कृतसाहित्ये कालिदासस्य विशिष्टतायाः कथनम् ।
- ✶ वर्णनरूपप्रक्रियायाः अवबोधनम् ।
- ✶ पञ्चमहाकाव्यान्तर्गतस्य "कुमारसम्भव" काव्यस्य परिचयः ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।

© SCERT not to be republished



* 1. अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी विगाह्य स्थितः पृथिव्या इव मानदण्डः ॥

*2. यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥

*3.अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥

* 4. आमेखलं सञ्चरतां घनानां छायामधस्सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः॥

*5. पदं तुषारस्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैः
मुक्ताफलैः केसरिणां किराताः॥



© SCERT not to be republished



*6. यः पूरयन्कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ॥

*7. कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धस्सुरभीकरोति ॥

*8. दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैश्शिरसां सतीव ॥

*9. लाङ्गूलविक्षेपविसर्पिशोभैः इतस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति वालव्यजनैश्चमर्यः ॥

*10.भागीरथीनिर्झरशीकरणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैः आसेव्यते भिन्नशिखण्डिबर्हः ॥

*11.सप्तर्षिहस्तावचितावशेषाण्यधो विवास्वान् परिवर्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥

*12.यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्री धरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥

© SCERT not to be republished



1. **अन्वयः** - उत्तरस्यां, दिशि, देवतात्मा हिमालयो नाम, नगाधिराजः, पूर्वापरौ, तोयनिधी, विगाह्य, पृथिव्याः, मानदण्डः इव, स्थितः, अस्ति ।

**भावः** - भारतदेशस्य उत्तरदिग्भागे स्वयं देवतास्वरूपः पर्वतानां राजा, हिमवान् पूर्वसमुद्रमारभ्य पश्चिमसमुद्रपर्यन्तं व्याप्य, पृथिव्याः मानदण्ड इव विराजते ।

(अनेन अस्य हिमालयस्य देवभूमित्वं चेतनाव्यवहारयोग्यत्वम्, औन्नत्यम् दैर्घ्यं च सूचितम् ।)

2. **अन्वयः** - सर्वशैलाः, यं, वत्सं, परिकल्प्य, दोहदक्षे, मेरौ, दोग्धरि स्थिते सति, भास्वन्ति, रत्नानि, महौषधीः च पृथूपदिष्टां, धरित्रीं, दुदुहुः ।

**भावः** - सर्वेऽपि पर्वताः नगाधिराजं हिमालयं वत्समिव कृत्वा दोहनक्रियाचतुरं सुमेरुं दोग्धारं च विधाय महाराजेन पृथुना उपदिष्टां प्रदर्शितायाः गोरूपधरायाः भूमेः प्रकाशमानानि रत्नानि सञ्जीविन्यादिमहौषधीश्च दुदुहुः ।

3. **अन्वयः** – अनन्तरत्नानां, प्रभवस्य, यस्य, हिमं, सौभाग्यविलोपि, न जातं, हि, एकः, दोषः, गुणानां, सन्निपाते, इन्दोः, किरणेषु, अङ्क इव, निमज्जति ।

**भावः** - नानाविधश्रेष्ठवस्तूत्पत्तिसमर्थस्य नगाधिराजस्य असौकर्यदायकं हिमं तस्य (हिमवतः) सौन्दर्यघातकं न भवत्येव । कुत इति चेत् - यथा चन्द्रबिम्बः चन्द्रस्य प्रकाशमानेषु किरणेषु कलङ्कः दृष्टिपथमागतोऽपि दोषकारकः न भवति तथैव अनन्तसद्गुणसमूहे पतितः स्वल्पः दोषः अपि न गण्यते ॥

4. **अन्वयः** - सिद्धाः, यस्य, आमेखलं, सञ्चरतां, घनानां, अधः, सानुगतां, छायां, निषेव्य, यदा, वृष्टिभिः, उद्वेजिताः, यस्य, आतपवन्ति, शृङ्गाणि, आश्रयन्ते ।

**भावः** - अनेन श्लोकेन हिमवतः औन्नत्यं ज्ञातं भवति । यथा सिद्धाः तीव्रेण आतपेन बाधिताः तदा मेघानाम् अधः आगत्य तत्र स्थितां छायां अनुभवन्ति । यदा ते तत्रैव वृष्टिभिः पीडिताः भवन्ति तदा ते शिखराग्राणि आश्रित्य (सूर्यप्रकाशं) आतपसौख्यं च अनुभवन्ति ॥

5. **अन्वयः** - यस्मिन्, किराताः, तुषारसृतिधौतरक्तं, हतद्विपानां, केसरिणां, पदम्, अदृष्ट्वा अपि, नखरन्ध्रस्य, मुक्तैः, मुक्ताफलैः, मार्गं, विदन्ति ।

**भावः** - एतस्मिन् हिमालये मृगयाविनोदिनः किराताः तत्रत्यतुषारधाराभिः क्षालितशौणितवन्तं हतद्विपानां सिंहानां पादप्रक्षेपणानि अदृष्ट्वापि नखरन्ध्रैः विमुक्तमौक्तिकैः तेषां सिंहानां मार्गं जानन्ति । हिमालयः विविधजन्तूनाम् आवासं कल्पयतीति भावार्थः।

6. **अन्वयः** - यः, दरीमुखोत्थेन, समीरणेन, कीचकरन्ध्रभागान्, पूरयन्, उद्गास्यतां, किन्नराणां, तानप्रदायित्वम्, उपगन्तुम्, इच्छतीव ।

© SCERT not to be republished

**भावः** - हिमालयः स्वगुहामुखेन वायुं वंशवृक्षेषु पूरयन् तत्र उच्चैः गानं कुर्वतीनां किन्नरस्त्रीणां तानत्वेन वाद्यसहकारम् इच्छन्निव प्रतिभाति ।

7. **अन्वयः** - यत्र, करिभिः, कपोलकण्डूः, विनेतुं, विघट्टितानां, सरलद्रुमाणां, सृतक्षीरतया, प्रसूतः, गन्धः, सानूनि, सुरभीकरोति ।

**भावः** - हिमालयपर्वते मदगजाः स्वशरीरोत्थकण्डूनिवारणार्थं तत्रस्थसरलद्रुमान् घट्टयन्ति । तादृशघर्षणेन निस्सृतेन तरुक्षीरेण समुत्पन्नः गन्धः सहजपरिमलरहितान्यपि सानूनि परिमलीकरेति ॥

8. **अन्वयः** - यः, दिवा, भीतं, गुहासु, लीनम्, अन्धकारं, दिवाकरात्, रक्षति, उच्चैः शिरसां, शरणं, प्रपन्ने. क्षुद्रे अपि, सति, इव, ममत्वं, भवति ।

**भावः** - लोके सज्जनाः समीपमागतं नीचजनमपि आदरेण अनुगृह्णन्ति । 'तथैव एष देवतात्मा हिमाद्रिः दिवाभीतमिव स्थितस्य तमसः स्वगुहासु आश्रयं ददाति (कल्पयति) ।

9. **अन्वयः** - चमर्यः, इतस्ततः, (लाङ्गूलविक्षेपविसर्पिशोभैः) लाङ्गूल - विक्षेप - विसर्पि - शोभैः, चन्द्रमरीचिगौरैः, वालव्यजनैः, यस्य, गिरिराजशब्दम्, अर्थयुक्तं, कुर्वन्ति ।

**भावः** - राजानः छत्रचामरादिलाङ्छनयुक्ताः भवन्ति । अतः एषः हिमालयोऽपि चमरीमृगाणां बाहुल्यात्, चामरवालव्यजनैश्च वीजितत्वात् राजलाङ्छनावरत्वेन गिरिराजः इति सार्थकनामधेयो भवति ।

10. **अन्वयः** - भागीरथीनिर्झरशीकराणां, मुहुः, कम्पितदेवदारुः, भिन्नशिखण्डिबर्हः, यद्वायुः, अन्विष्टमृगैः, किरातैः, आसेव्यते ।

**भावः** - गङ्गाप्रवाहशीकरैः सिक्तैः नृत्यं कुर्वद्भ्यः शिखण्डीनां पिञ्छेभ्यः एवं कम्पितदेवदारुवृक्षेभ्यः उत्पन्नसमीरैः मृगया श्रान्ताः किराताः हिमाचले नितरां विश्रान्तिम् अनुभवन्ति ।

11. **अन्वयः** - सप्तर्षिहस्तावचितावशेषाणि, पद्मानि, अधः, परिवर्तमानः, विवस्वान्, ऊर्ध्वमुखैः, मयूखैः, प्रबोधयति ।

**भावः** - सप्तर्षिभिः तेषां मण्डलसमीपस्थे हिमालयाग्रसरोवरे देवतार्चनार्थं कतिपयानि पद्मानि अपचयन्ति स्म । ततः अवशिष्टानि सरोवरस्य पद्मानि सूर्यः स्वस्य ऊर्ध्वमुखैः किरणैः विकासयति । अनेन हिमालयशिखराणि सूर्यमण्डलमतिक्रम्य महौन्नत्येन वर्तन्त इति प्रतीयते ।

12. **अन्वयः** - यस्य, यज्ञाङ्गयोनित्वं, धरित्रीधरणक्षमं, सारं, अवेक्ष्य, प्रजापतिः, स्वयमेव, कल्पितयज्ञभागः, शैलाधिपत्यं, च, अन्वतिष्ठत् ।

**भावः** - सः हिमवान् यज्ञोपकरणीभूतसोमलतादीनाम् ओषधीनां प्रभवत्वं तस्य धरित्रीधरणक्षमं बलं च वीक्ष्य ब्रह्मा स्वयमेव तस्मै यज्ञभागभोक्तृत्वं शैलराज्याधिपत्यं च प्रदत्तवान् ।

© SCERT not to be republished

# एतानि कुर्वन्तु

## I. भावावगाहनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. पाठे स्थितानि "महाकविकालिदासवर्णनाचातुर्यसम्बद्धानि" त्रिचतुराणि वाक्यानि वदन्तु ।

२. कालिदासः इव एकस्य वस्तुनः अन्येन वस्तुना उपमां कुर्वन् त्रिचतुराणि वाक्यानि वदन्तु ।

३. 'एको हि दोषः गुणसन्निपाते निमज्जति' इत्यस्य वाक्यस्य भावः कः? विचिन्त्य वदन्तु ।

४. 'यं सर्वशैलाः' इति श्लोके कः कीदृशः अभवत् इति वदन्तु ।

५. हिमालयस्य गिरिराजत्वं कथं सिद्धम् इति वदन्तु ।

### आ. अधः दत्तानि वाक्यानि पठन्तु । तेषां समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु ।

१. उत्तरदिशि हिमवत्पर्वतः विद्यते ।

२. बाधिताः ऋषयः शिखराग्राणि आश्रयन्ति ।

३. मौक्तिकश्रेणीद्वारा मार्गं जानन्ति ।

४. स्वयं पर्वतानाम् आधिपत्यं दत्तवान् ।

### इ. पाठं पठित्वा रिक्तस्थानानि पूरयन्तु ।

१. भास्वन्ति रत्नानि ............ ।

२. एको हि ............. गुणसन्निपाते ।

३. .............. केसरिणां किराताः ।

४. उद्गास्यतामिच्छति ....................

५. कपोलकण्डूः ..................... विनेतुम् ।

### ई. अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

**मूकः परापवादे, परदारनिरीक्षणेऽपि यश्चान्धः।**
**पङ्गुः परधनहरणे, स जयति लोकत्रये पुरुषः ॥**

१. कस्मिन् सन्दर्भे मूकः भवेत् ?

२. परदारनिरीक्षणे कः भवेत् ?

३. कस्मिन् सन्दर्भे पङ्गुः भवेत् ?

### उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. पृथिव्याः मानदण्डः इव कः वर्तते ?

२. हिमं किमर्थं सौभाग्यविलोपि न जातम् ?

३. किराताः सिंहानां मार्गं कथं जानन्ति ?

४. सानूनां परिमलत्वं कथम् अभवत् ?

५. चमर्यः कथं गिरिराजशब्दं सार्थकं कुर्वन्ति?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि लिखन्तु ।

१. हिमालयः मानदण्डः इव वर्तते । कथमिदं वाक्यं युक्तं भवति ?

२. गुणसमूहेषु एकः दोषः न परिगणनीयः कथम् ?

३. गोरूपधरा का ?

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. हिमवत्पर्वतस्य औन्नत्यं लिखन्तु ।

२. सिद्धाः आतपसौख्यं कथम् अनुभवन्ति ?

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. श्लोकानां भावाः भवद्भिः ज्ञाताः खलु ! एवम् एतान् श्लोकान् आधारीकृत्य एकां कथां लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

శివాజీ తల్లి జిజియాబాయి. తండ్రి షయాజీ. శివాజీ మొదట దాదాజీ కొండదేవ్ దగ్గర శస్త్రాస్త్రవిద్యలు నేర్చుకొనెను. సమర్ధరామదాసు, భక్తతుకారాం వంటి సాధుసంతుల ఆశీస్సులతో అనేక కోటలను జయించెను. శివాజీ ఛత్రపతి అను బిరుదమును పొందెను.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

हिमालयवर्णनस्य पठनेन कालिदासः महाकविः इति त्वया अवगतम् । तमेव भावं वर्णयन् आत्मनः पितामहाय लेखं लिखन्तु ।

©SCERT not to be republished

## III. भाषांशाः

### 1. पदजालाभिवृध्दिः

**अ) अधः दत्तानां पदानां समानार्थकपदानि श्लोकेषु अन्विष्य सम्पूर्णवाक्यं लिखन्तु ।**

**उदा - इन्दुः- चन्द्रः - चन्द्रः चन्द्रिकां ददाति ।**

१. शैलः - .......... ...................... ।

२. घनः - .......... ...................... ।

३. हिमम् - .......... ..................... ।

४. सिंहाः - .......... ..................... ।

५. वृक्षः - .......... ..................... ।

**आ) व्यस्तवाक्यानि पठित्वा शुद्धीकृत्य पुनः लिखन्तु ।**

१. हिमालयः दिशि उत्तरस्याम् अस्ति ।

२. स्नुतक्षीरतया सानूनि गन्धः प्रसूतः सुरभीकरोति ।

३. केसरिणां किराताः मुक्ताफलैः जानन्ति मार्गं ।

४. गुहासु रक्षति यः दिवाकरात् ।

५. स्वयं शैलाधिपत्यं अन्वतिष्ठत् ।

**इ) अधः दत्तानां पदानां विरुद्धार्थकपदानि ज्ञात्वा तानि उपयुज्य वाक्यानि लिखन्तु ।**

**उदा -** अस्ति × नास्ति - रमेशस्य धनं अस्ति । विद्या नास्ति ।

प्रकाशः ×

अन्तः ×

जातः ×

उपरि ×

## II. भाषांशाः

| **अ. सन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु ।** | **आ. विसन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु ।** |
|---|---|
| अस्ति + उत्तरस्याम् | देवतात्मा |
| नग + अधिराजः | हिमालयो नाम |
| इव + उपगन्तुम् | पूर्वापरौ |
| अदृष्ट्वा + अपि | सतीव |
| शैल + आधिपत्यम् | सप्तर्षिः |



© SCERT not to be republished

## इ) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखित्वा समासनामानि लिखन्तु ।

| | |
|---|---|
| १. नगाधिराजः | ५. गुणसन्निपाते |
| २. सर्वशैलाः | ६. द्विपः |
| ३. पृथूपदिष्टाम् | ७. लाङ्गूलविक्षेपः |
| ४. सौभाग्यविलोपि | ८. शैलाधिपत्यम् |

## ई) अधः दत्तयोः द्वयोः श्लोकपादयोः गुरुलघुनिरूपणं गणविभजनञ्च अवगच्छन्तु ।

| | | | | |
|---|---|---|---|---|
| | U U । | U U । | । U । | U U |
| १. | अ स्त्यु त्त | र स्यां दि | शि दे व | ता त्मा |
| | त | त | ज | ग ग |

| | | | | |
|---|---|---|---|---|
| | । U । | U U । | । U । | U U |
| २. | हि मा ल | यो ना म | न गा धि | रा जः |
| | ज | त | ज | ग ग |

- उपरि स्थिते प्रथमपादे क्रमेण **त - त - ज - गुरुद्वयमिति** इन्द्रवज्राच्छन्दोवृत्तसम्बद्धगणाः वर्तन्ते ।

- द्वितीयपादे क्रमेण **ज - त - ज - गुरुद्वयमिति** उपेन्द्रवज्राच्छन्दोवृत्तसम्बद्धगणाः वर्तन्ते । एवं प्रकारेण इन्द्रवज्रोपेन्द्रवज्रयोः सम्मेलनम् **"उपजातिः"** इत्युच्यते ।

**उपजातेः लक्षणम्** -

> "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः"

**चतुर्ष्वपि पादेषु इन्द्रवज्रोपेन्द्रवज्रयोः एकपादपरिमितत्वेन द्विपादद्वित्रिपादपरिमितत्वेन वा लक्षणे प्रत्येकं भिन्नतया यत्र प्रयुज्येते तत्र "उपजातिः" भवति ।**

## उ) अधः दत्तानां श्लोकपादानां गुरुलघुनिरूपणपुरस्सरं गणविभजनं सोदाहरणं निरूपयन्तु ।

**श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याणगुणाभिरामः ।**
**सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु ॥**

© SCERT not to be republished

ऊ) पठन्तु, अवगच्छन्तु ।

१. **हनुमानब्धिमतरत् दुष्करं किं महात्मनाम् ।**

- अत्र ''हनूमान् अब्धिम् अतरत्'' इति विशेषविषयः
''दुष्करं किं महात्मनाम्'' इति सामान्येन समर्थितः ।

२. **'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः' ।**

- अत्र ''एकः दोषः गुणसन्निपाते निमज्जति'' - इति सामान्यम्,
''चन्द्रकिरणेषु कलङ्कः यथा न गोचरो भवति'' इति विशेषेण समर्थितः ।

**विवरणम्** : **यत्र सामान्यं विशेषेण वा, विशेषः सामान्येन वा समर्थ्यते, तत्र ''अर्थान्तरन्यासालङ्कारः'' भवति ।**

**लक्षणम्** - **उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः ।**

ऋ) अधः दत्तस्य वाक्यस्य दत्तान् प्रश्नान् आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ।

**विवेकानन्दः समुद्रमध्ये शिलायां तपश्चकार । नास्ति असाध्यं महात्मनाम् ।**

१. कः तपश्चकार ?
२. कुत्र तपश्चकार ?
३. अस्मिन् सामान्यवाक्यं किम् ?
४. विशेषवाक्यं किम् ?
५. कः कं समर्थयति ?
६. अयं कः अलङ्कारः ?
७. अर्थान्तरन्यासालङ्कारे के मुख्यांशाः भवन्ति ?

इ) अधः दत्तस्य श्लोकस्य अलङ्कारनिरूपणं कुर्वन्तु ।

**गुणवज्जनसंसर्गात् याति स्वल्पोऽपि गौरवम् ।**
**पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥**

## परियोजनाकार्यम्

'उपमा कालिदासस्य' इति प्रशस्तिः विद्यते । भवद्भिः पाठे बहुत्र उपमालङ्कारप्रयोगः दृष्टः । अतः अन्येषु काव्येषु कृतानाम् उपमालङ्कारप्रयोगाणां वाक्यानि भवदधीतपाठ्यांशान् अनुसृत्य सङ्कलयन्तु, भित्तिपत्रे स्थापयन्तु ।

© SCERT not to be republished